| CSM – 45/19 |
|---|
| **Indian Language & Literature in Sanskrit** |
| **Paper – II** |

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any* ***three*** *of the remaining questions, selecting at least* ***one*** *from each Section.*

## SECTION – A

1. अधस्तनेषु किमपि त्रयं प्रतिपादयत : 20×3 = 60

(क) संस्कृतमहाकाव्यानामुत्पत्तिः विकासश्च

(ख) संस्कृतवाङ्मये नीतिसाहित्यम्

(ग) भारतीया आस्तिकदर्शनपरम्परा

(घ) रम्या रामायणी कथा

2. कविकुलगुरुकालिदासरचितकाव्यकृतीनां समीक्षणं कुरुत । 60

3. गद्यकाव्यपरम्परायां बाणभट्टस्य काव्यनैपुण्यं विश्लेषयत । 60

4. श्रीमद्भगवद्गीतायाः महत्त्वं प्रतिपादयत । 60

## SECTION – B

5. A, B, C, D इति उपवर्गे केषाञ्चित् **त्रयाणां** व्याख्या करणीया :

(A) (क) यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वानि रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥

(ख) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रुणुते स किं प्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥

20

(B) (क) अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्शन् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥

(ख) नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

20

(C) (क) जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥

(ख) यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवम्

तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।

यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं

तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ 20

(D) (क) कः कं शक्तो रक्षितुं मृत्युकाले

रज्जुच्छेदे के घटं धारयन्ति ।

एवं लोकस्तुल्यधर्मो वनानां

काले काले छिद्यते रुह्यते च ॥

(ख) अद्वैतं सुखदुः खयोरनुगतं सर्वास्ववस्थासु यद्

विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।

कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं

भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राथ्यते ॥

20

6. अभिज्ञानशाकुन्तले चतुर्थाङ्कस्य प्रसिद्धश्लोकचतुष्टयस्य महत्त्वं विशदयत । 60

7. (क) रघुवंशमहाकाव्यस्य प्रथमसर्गे पञ्चमश्लोकादारभ्य दशमश्लोकावधिपाठ्यांशे वर्णितरघुकुलस्य महिमानं विवृणुत । 30

(ख) निम्नोक्तयोरुद्धत्योः व्याख्यां कुरुतः :　　15×2 = 30

(i) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपममानुष-
शक्तित्वश्चेति महतीयं खल्वनर्थपरम्परा ।
सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः ।

(ii) मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम् ।
पिनद्धां धूमजालेन शिखामिव विभावसोः ॥

8. अधोलिखितेषु एकं प्रश्नमुत्तरयतः :　　60

(क) तर्कसंग्रहमनुसृत्य पञ्चविंशतिगुणान् आलोचयत ।

(ख) वेदान्तशास्त्राध्ययनस्य कोऽधिकारी भवितुमर्हति-
वेदान्तसारमुपजीव्य विशदयत ।

(ग) मनुस्मृत्यंनुसारं ब्रह्मचारिणः कर्त्तव्याकर्त्तव्यानि आलोचयत ।